# Tarka-Sangraha of Annambhatta

# અન્નમ્ભટ્ટલિખિત તર્કસંગ્રહ

## Document Information

Text title : Tarka-Samgraha of Annambhatta

File name : tarka2.itx

Category : major_works

Location : doc_z_misc_major_works

Author : Annambhatta

Transliterated by : Sovarel Vlad vlad.sovarel at yahoo.com

Proofread by : Sovarel Vlad, Br. Chaitanya Vijay

Description-comments : Tarka-Samgraha with the Dipika of Annambhatta and (without Dipika 1980 version)

Latest update : January 15, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# અન્નમ્ભટ્ટલિખિત તર્કસંગ્રહ

નિધાય હૃદિ વિશ્વેશં વિધાય ગુરુવન્દનમ્ ।
બાલાનાં સુખબોધાય ક્રિયતે તર્કસંગ્રહઃ ॥

દ્રવ્યગુણકર્મસામાન્યવિશેષસમવાયાઽભાવાઃ
સપ્તપદાર્થાઃ ॥ ૧॥

તત્ર દ્રવ્યાણિ
પૃથિવ્યપ્તેજોવાય્વાકાશાકાલદિગાત્મમનાંસિ નવૈવ ॥ ૨॥

રૂપરસગન્ધસ્પર્શસંખ્યાપરિમાણપૃથક્ત્વસંયોગવિભાગ-
પરત્વાપરત્વગુરુત્વ-
દ્રવત્વ-સ્નેહ-શબ્દ-બુદ્ધિ-સુખ-દુઃખેચ્છા-દ્વેષ-પ્રયત્ન-
ધર્માધર્મ-સંસ્કારાઃ ચતુર્વિંશતિર્ગુણાઃ ॥ ૩॥

ઉત્ક્ષેપણાપક્ષેપણાકુઞ્ચનપ્રસારણગમનાનિ
પઞ્ચ કર્માણિ ॥ ૪॥

પરમપરં ચેતિ દ્વિવિધં સામાન્યમ્ ॥ ૫॥

નિત્યદ્રવ્યવૃત્તયો વિશેષાસ્ત્વનન્તા એવ ॥ ૬॥

સમવાયસ્ત્વેક એવ ॥ ૭॥

અભાવશ્ચતુર્વિધઃ પ્રાગભાવઃ પ્રધ્વંસાભાવઃ
અત્યન્તાભાવઃ અન્યોન્યાભાવશ્ચેતિ ॥ ૮॥

તત્ર ગન્ધવતી પૃથિવી ।
સા દ્વિવિધાનિત્યાઽનિત્યા ચ ।
નિત્યાઃ પરમાણુરૂપાઃ ।
અનિત્યાઃ કાર્યરૂપાઃ ।
પુનસ્ત્રિવિધાઃ શરીરેન્દ્રિયવિષયભેદાત્ ।

શરીરમસ્મદાદીનામ્ ।
ઇન્દ્રિયં ગન્ધગ્રાહકં ઘ્રાણમ્ ।
તચ્ચ નાસાગ્રવર્તિ ।
વિષયો મૃત્પાષાણાદિઃ ॥ ૯॥

શીતસ્પર્શવત્યઃ આપઃ ।
તા દ્વિવિધાઃ નિત્યા અનિત્યાશ્ચ ।
નિત્યાઃ પરમાણુરૂપાઃ ।
અનિત્યાઃ કાર્યરૂપાઃ ।
પુનસ્ત્રિવિધા શરીરેન્દ્રિયવિષયભેદાત્ ।
શરીરં વરુણલોકે ।
ઇન્દ્રિયં રસગ્રાહકં રસનં જિહ્વાગ્રવર્તિ ।
વિષયઃ સરિત્સમુદ્રાદિઃ ॥ ૧૦॥

ઉષ્ણસ્પર્શવત્તેજઃ ।
તચ્ચ દ્વિવિધં નિત્યમનિત્યં ચ ।
નિત્યં પરમાણુરૂપમ્ ।
અનિત્યં કાર્યરૂપમ્ ।
પુનસ્ત્રિવિધં શરીરેન્દ્રિયવિષયભેદાત્ ।
શરીરમાદિત્યલોકે પ્રસિદ્ધમ્ ।
ઇન્દ્રિયં રૂપગ્રાહકં ચક્ષુઃ કૃષ્ણતારાગ્રવર્તિ ।
વિષયશ્ચતુર્વિધઃ ભૌમદિવ્યૌદર્યાકરજભેદાત્ ।
ભૌમં વહ્ન્યાદિકમ્ ।
અબિન્ધનં દિવ્યં વિદ્યુદાદિ ।
ભુક્તસ્ય પરિણામહેતુરૌદર્યમ્ ।
આકરજં સુવર્ણાદિ ॥ ૧૧॥

રૂપરહીતઃ સ્પર્શવાન્વાયુઃ ।
સ દ્વિવિધઃ નિત્યોऽનિત્યશ્ચ ।
નિત્યઃ પરમાણુરૂપઃ ।
અનિત્યઃ કાર્યરૂપઃ ।
પુનસ્ત્રિવિધઃ શરીરેન્દ્રિયવિષયભેદાત્ ।
શરીરં વાયુલોકે ।
ઇન્દ્રિયં સ્પર્શગ્રાહકં ત્વક્સર્વશરીરવર્તિ ।

વિષયો વૃક્ષાદિકમ્પનહેતુઃ ॥ ૧૨॥

શરીરાન્તઃસંચારી વયુઃ પ્રાણઃ ।
સ ચ એકોઽપ્યુપાધિભેદાત્પ્રાણાપાનાદિસંજ્ઞાં લભતે ॥ ૧૩॥

શબ્દગુણકમાકાશમ્ ।
તચ્ચૈકં વિભુ નિત્યઞ્ચ ॥ ૧૪॥

અતીતાદિવ્યવહારહેતુઃ કાલઃ ।
સ ચૈકો વિભુર્નિત્યશ્ચ ॥ ૧૫॥

પ્રાચ્યાદિવ્યવહારહેતુર્દિક્ ।
સા ચૈકા વિભ્વી નિત્યા ચ ॥ ૧૬॥

જ્ઞાનાધિકરણમાત્મા ।
સ દ્વિવિધઃ પરમાત્મા જીવાત્મા ચ ।
તત્રેશ્વરઃ સર્વજ્ઞઃ પરમાત્મૈક એવ ।
જીવાત્મા પ્રતિશરીરં ભિન્નો વિભુર્નિત્યશ્ચ ॥ ૧૭॥

સુખાદ્યુપલબ્ધિસાધનમિન્દ્રિયં મનઃ ।
તચ્ચ પ્રત્યાત્મનિયતત્વાદનન્તં પરમાણુરૂપં નિત્યં
ચ ॥ ૧૮॥

ચક્ષુર્માત્રગ્રાહ્યો ગુણો રૂપમ્ ।
તચ્ચ શુક્લનીલપીતરક્તહરિતકપિશચિત્ર
ભેદાત્સપ્તવિધમ્ ।
પૃથિવીજલતેજોવૃત્તિ ।
તત્ર પૃથિવ્યાં સપ્તવિધમ્ ।
અભાસ્વરશુક્લં જલે ।
ભાસ્વરશુક્લં તેજસિ ॥ ૧૯॥

રસનગ્રાહ્યો ગુણો રસઃ ।
સ ચ મધુરામ્લલવણકટુકષાયતિક્તભેદાત્
ષડ્વિધઃ ।
પૃથિવીજલવૃત્તિઃ । તત્ર પૃથિવ્યાં ષડ્વિધઃ।
જલે મધુર એવ ॥ ૨૦॥

ઘ્રાણગ્રાહ્યો ગુણો ગન્ધઃ ।

સ દ્વિવિધઃ સુરભિરસુરભિશ્ચ ।
પૃથિવીમાત્રવૃત્તિઃ ॥ ૨૧॥

ત્વગિન્દ્રિયમાત્રગ્રાહ્યો ગુણઃ સ્પર્શઃ ।
સ ચ ત્રિવિધઃ શીતોષ્ણાનુષ્ણાશીતભેદાત્ ।
પૃથિવ્યપ્તેજોવાયુવૃત્તિઃ ।
તત્ર શીતો જલે ।
ઉષ્ણસ્તેજસિ ।
અનુષ્ણાશીતઃ પૃથિવીવાય્વોઃ ॥ ૨૨॥

રૂપાદિચતુષ્ટયં પૃથિવ્યાં પાકજમનિત્યં ચ ।
અન્યત્ર અપાકજં નિત્યમનિત્યં ચ ।
નિત્યગતં નિત્યમ્ ।
અનિત્યગતમનિત્યમ્ ॥ ૨૩॥

એકત્વાદિવ્યવહારહેતુઃ સંખ્યા ।
સા નવદ્રવ્યવૃત્તિઃ એકત્વાદિપરાર્ધપર્યન્તા ।
એકત્વં નિત્યમનિત્યં ચ ।
નિત્યગતં નિત્યમ્ ।
અનિત્યગતમનિત્યમ્ ।
દ્વિત્વાદિકં તુ સર્વત્રાઽનિત્યમેવ ॥ ૨૪॥

માનવ્યવહારાસાધારણકારણં પરિમાણમ્ ।
નવદ્રવ્યવૃત્તિઃ ।
તચ્ચતુર્વિધમ્ ।
અનુ મહદ્દીર્ઘં હૃસ્વં ચેતિ ॥ ૨૫॥

પૃથગ્વ્યવહારાસાધારણકારણં પૃથક્ત્વમ્ ।
સર્વદ્રવ્યવૃત્તિઃ ॥ ૨૬॥

સંયુક્તવ્યવહારહેતુઃ સંયોગઃ ।
સર્વદ્રવ્યવૃત્તિઃ ॥ ૨૭॥

સંયોગનાશકો ગુણો વિભાગઃ ।
સર્વદ્રવ્યવૃત્તિઃ ॥ ૨૮॥

પરાપરવ્યવહારાસાધારણકારણે પરત્વાપરત્વે ।

પૃથિવ્યાદિચતુષ્ટય મનોવૃત્તિની ।
તે દ્વિવિધે દિક્કૃતે કાલકૃતે ચ ।
દૂરસ્તે દિક્કૃતં પરત્વમ્ ।
સમીપસ્થે દિક્કૃતમપરત્વમ્ ।
જ્યેષ્ઠે કાલકૃતં પરત્વમ્ ।
કનિષ્ઠે કાલકૃતમપરત્વમ્ ॥ ૨૯॥

આદ્યપતનાસમવાયિકારણં ગુરુત્વમ્ ।
પૃથિવીજલવૃત્તિ ॥ ૩૦॥

આદ્યસ્યન્દનાસમવાયિકારણં દ્રવત્વમ્ ।
પૃથિવ્યપ્તેજોવૃત્તિ ।
તદ્વિવિધં સાંસિદ્ધિકં નૈમિત્તિકં ચ ।
સાંસિદ્ધિકં જલે ।
નૈમિત્તિકં પૃથિવીતેજસોઃ ।
પૃથિવ્યાં ઘૃતાદાવગ્નિ સંયોગજં દ્રવત્વમ્ ।
તેજસિ સુવર્ણાદૌ ॥ ૩૧॥

ચૂર્ણાદિપિણ્ડીભાવહેતુર્ગુણઃ સ્નેહઃ ।
જલમાત્રવૃત્તિઃ ॥ ૩૨॥

શ્રોત્રગ્રાહ્યો ગુણઃ શબ્દઃ આકાશમાત્રવૃત્તિઃ ।
સ દ્વિવિધઃ ધ્વન્યાત્મકઃ વર્ણાત્મકશ્ચ ।
તત્ર ધ્વન્યાત્મકઃ ભેર્યાદૌ ।
વર્ણાત્મકઃ સંસ્કૃતભાષાદિરૂપઃ ॥ ૩૩॥

સર્વવ્યવહારહેતુર્ગુણો બુદ્ધિર્જ્ઞાનમ્ ।
સા દ્વિવિધા સ્મૃતિરનુભવશ્ચ ।
સંસ્કારમાત્રજન્યં જ્ઞાનં સ્મૃતિઃ ।
તદ્ભિન્નં જ્ઞાનમનુભવઃ ।
સ દ્વિવિધઃ યથાર્થોઽયથાર્થશ્ચ ।
તદ્વતિ તત્પ્રકારકોઽનુભવો યથાર્થઃ ।
યથા રજતે ઇદં રજતમિતિ જ્ઞાનમ્ ।
સૈવ પ્રમેત્યુચ્યતે ।
તદભાવવતિ તત્પ્રકારકોઽનુભવોઽયથાર્થઃ ।

યથા શુક્તાવિદંરજતમિતિ જ્ઞાનમ્ ।
સૈવ અપ્રમેત્યુચ્યતે ॥ ૩૪॥

યથાર્થનુભવશ્ચતુર્વિધઃ
પ્રત્યક્ષાનુમિત્યુપમિતિશાબ્દભેદાત્ ।
તત્કરણમપિ ચતુર્વિધં
પ્રત્યક્ષાનુમાનોપમાનશબ્દાભેદાત્ ॥ ૩૫॥

અસાધારણં કારણં કરણમ્ ।
કાર્યનિયતપૂર્વવૃત્તિ કારણમ્ ।
કાર્યં પ્રાગભાવપ્રતિયોગિ ॥ ૩૬॥

કારણં ત્રિવિધં સમવાય્યસમવાયિનિમિત્તભેદાત્ ।
યત્સમવેતં કાર્યમુત્પદ્યતે તત્સમવાયિકારણમ્ ।
યથા તંતવઃ પટસ્ય પટશ્ચ સ્વગતરૂપાદેઃ ।
કાર્યેણ કારણેન વા સહૈકસ્મિન્નર્થે સમવેતત્વે સતિ
યત્કારણં
તદસમવાયિકારણમ્ ।
યથા તંતુસંયોગઃ પટસ્ય તન્તુરૂપં પટરૂપસ્ય ।
તદુભયભિન્નં કારણં નિમિત્તકારણમ્ ।
યથા તુરીવેમાદિકં પટસ્ય ।
તદેતત્ત્રિવિધકારણમધ્યે યદસાધારણં કારણં
તદેવ કરણમ્ ॥ ૩૭॥

તત્ર પ્રત્યક્ષજ્ઞાનકરણં પ્રત્યક્ષમ્ ।
ઇન્દ્રિયાર્થસંનિકર્ષજન્યં જ્ઞાનં પ્રત્યક્ષમ્ ।
તદ્વિવિધં નિર્વિકલ્પકં સવિકલ્પકં ચેતિ ।
તત્ર નિષ્પ્રકારણં જ્ઞાનં નિર્વિકલ્પકં યથેદં
કિઞ્ચિત્ ।
સપ્રકારકં જ્ઞાનં સવિકલ્પકં યથા ડિત્થોઽયં
બ્રાહ્મણોઽયં શ્યામોઽયં
પાચકોઽયમિતિ ॥ ૩૮॥

પ્રત્યક્ષજ્ઞાનહેતુરિન્દ્રિયાર્થસંનિકર્ષઃ
ષડ્વિધઃ ।

સંયોગઃ સંયુક્તસમવાયઃ સંયુક્તસમવેતસમવાયઃ
સમવાયઃ
સમવેતસમવાયઃ વિશેષણવિશેષ્યભાવશ્ચેતિ ।
ચક્ષુષા ઘટપ્રત્યક્ષજનને સંયોગઃ સંનિકર્ષઃ ।
ઘટરૂપપ્રત્યક્ષજનને સંયુક્તસમવાયઃ
સંનિકર્ષઃ ।
ચક્ષુઃ સંયુક્તે ઘટે રૂપસ્ય સમવાયાત્ ।
રૂપત્વસામાન્યપ્રત્યક્ષે સંયુક્તસમવેતસમવાયઃ
સંનિકર્ષઃ ।
ચક્ષુઃ સંયુક્તે ઘટે રૂપં સમવેતં તત્ર
રૂપત્વસ્ય સમવાયાત્ ।
શ્રોત્રેણ શબ્દસાક્ષાત્કારે સમવાયઃ સંનિકર્ષઃ
કર્ણવિવરવર્ત્યાકાશસ્ય
શ્રોત્રત્વાત્ શબ્દસ્યાકાશગુણત્વાદ્ગુણગુણિનોશ્ચ
સમવાયાત્ ।
શબ્દત્વસાક્ષાત્કારે સમવેતસમવાયઃ સંનિકર્ષઃ
શ્રોત્રસમવેતે શબ્દે
શબ્દત્વસ્ય સમવાયાત્ ।
અભાવપ્રત્યક્ષે વિશેષણવિશેષ્યભાવઃ સંનિકર્ષઃ
ઘટાભાવવદ્ભૂતલમિત્યત્ર
ચક્ષુઃ સંયુક્તે ભૂતલે ઘટાભાવસ્ય વિશેષણત્વાત્ ।
એવં સંનિકર્ષષટ્કજન્યં જ્ઞાનં પ્રત્યક્ષં
તત્કરણમિન્દ્રિયં
તસ્માતિન્દ્રિયં પ્રત્યક્ષપ્રમાણમિતિ સિદ્ધમ્ ॥ ૩૯॥

અનુમિતિકરણમનુમાનમ્ ।
પરામર્શજન્યં જ્ઞાનમનુમિતિઃ ।
વ્યાપ્તિવિશિષ્ટપક્ષધર્મતાજ્ઞાનમ્ ।
યથા વહ્નિવ્યાપ્યધૂમવાનયં પર્વત ઇતિ જ્ઞાનં
પરામર્શઃ ।
તજ્જન્યં પર્વતો વહ્નિમાનિતિ જ્ઞાનમનુમિતિઃ ।
યત્ર યત્ર ધૂમસ્તત્ર તત્રાગ્નિરિતિ સાહચર્યનિયમો

વ્યાપ્તિઃ ।
વ્યાપ્યસ્ય પર્વતાદિવૃત્તિત્વં પક્ષધર્મતા ॥ ૪૦॥

અનુમાનં દ્વિવિધં સ્વાર્થં પરાર્થં ચ ।
તત્ર સ્વાર્થં સ્વાનુમિતિહેતુઃ તથાહિ સ્વાયમેવ
ભૂયોદર્શનેન યત્ર યત્ર
ધૂમસ્તત્ર તત્રાગ્નિરિતિ મહાનસાદૌ વ્યાપ્તિં ગૃહીત્વા
પર્વતસમીપં ગતઃ
તદ્ગતે ચાગ્નૌ સન્દિહાનઃ પર્વતે ધૂમં પશ્યન્વ્યાપ્તિં
સ્મરતિ યત્ર યત્ર
ધૂમસ્તત્ર તત્રાગ્નિરિતિ ।
તદનન્તરં વહ્નિવ્યાપ્યધુમવાનયં પર્વત ઇતિ
જ્ઞાનમુત્પદ્યતે અયમેવ
લિઙ્ગપરામર્શ ઇત્યુચ્યતે ।
તસ્માત્પર્વતો વહ્નિમાનિતિ જ્ઞાનમનુમિતિઃ ઉત્પદ્યતે ।
તદેતત્સ્વાર્થાનુમાનમ્ ।
યત્તુ સ્વયં ધુમાગ્નિમનુમાય પરંપ્રતિબોધયિતું
પઞ્ચાવયવ વાક્યં પ્રયુજ્યતે
તત્પરાર્થાનુમાનમ્ ।
યથા પર્વતો વહ્નિમાન્ધૂમત્વાદ્યો યો ધૂમવાન્સ
વહ્નિમાન્યથા મહાનસઃ તથા
ચાયં તસ્માત્તથેતિ ।
અનેન પ્રતિપાદિતાલ્લિઙ્ગાત્પરોઽપ્યગ્નિં પ્રતિપદ્યતે ॥ ૪૧॥

પ્રતિજ્ઞાહેતૂદાહરણોપનયનિગમનાનિ પઞ્ચાવયવાઃ ।
પર્વતો વહ્નિમાનિતિ પ્રતિજ્ઞા ।
ધૂમવત્વાદિતિ હેતુઃ ।
યો યો ધૂમવાન્સ વહ્નિમાન્યથા મહાનસ ઇત્યુદાહરણમ્ ।
તથા ચાયમિત્યુપનયઃ ।
તસ્માત્તથેતિ નિગમનમ્ ॥ ૪૨॥

સ્વાર્થાનુમિતિપરાર્થાનુમિત્યોઃ લિઙ્ગપરામર્શ એવ
કરણમ્ ।
તસ્માલ્લિઙ્ગપરામર્શોઽનુમાનમ્ ॥ ૪૩॥

લિઙ્ગં ત્રિવિધમ્ ।
અન્વયવ્યતિરેકિ કેવલાન્વયિ કેવલવ્યતિરેકિ ચેતિ ।
અન્વયેન વ્યતિરેકેણ ચ વ્યાપ્તિમદન્વયવ્યતિરેકિ ।
યથા વહ્નૌ સાધ્યે ધૂમવત્ત્વમ્ ।
યત્ર ધૂમસ્તત્રાગ્નિર્યથા મહાનસ ઇત્યન્વયવ્યાપ્તિઃ ।
યત્ર વહ્નિર્નાસ્તિ તત્ર ધૂમોઽપિ નાસ્તિ યથા મહાહ્રિદ
ઇતિ વ્યતિરેકવ્યાપ્તિઃ ।
અન્વયમાત્રવ્યાપ્તિકં કેવલાન્વયિ ।
યથા ઘટોઽભિધેયઃ પ્રમેયત્વાત્પટવત્ ।
અત્ર પ્રમેયત્વાભિધેયત્વયોઃ વ્યતિરેકવ્યાપ્તિર્નાસ્તિ
સર્વસ્યાપિ
પ્રમેયત્વાદભિધેયત્વાચ્ચ ।
વ્યતિરેકમાત્રવ્યાપ્તિકં કેવલવ્યતિરેકિ યથા
પૃથિવીતરેભ્યો ભિદ્યતે ગન્ધવત્ત્વાત્ ।
યદિતરેભ્યો ન ભિદ્યતે ન તદ્ગન્ધવદ્યથા જલમ્ ।
ન ચેયં તથા ।
તસ્માન્ન તથેતિ ।
અત્ર યદ્ગન્ધવત્તદિતરભિન્નમિત્યન્વયદૃષ્ટાન્તો
નાસ્તિ પૃથિવીમાત્રસ્ય
પક્ષત્વાત્ ॥ ૪૪॥

સન્દિગ્ધસાધ્યવાન્પક્ષઃ ।
યથા ધૂમવત્ત્વે હેતૌ પર્વતઃ ।
નિશ્ચિતસાધ્યવાન્સપક્ષઃ યથા તત્રૈવ મહાનસમ્ ।
નિશ્ચિતસાધ્યાઽભાવવાન્વિપક્ષઃ યથા તત્રૈવ
મહાહ્રદઃ ॥ ૪૫॥

સવ્યભિચારવિરુદ્ધસત્પ્રતિપક્ષાસિદ્ધબાધિતાઃ પઞ્ચ
હેત્વાભાસાઃ ।
સવ્યભિચારોઽનૈકાન્તિકઃ ।
સ ત્રિવિધઃ સાધારણાસાધારણાનુપસંહારિભેદાત્ ।
તત્ર સાધ્યાભાવવદ્વૃત્તિઃ સાધારણોઽનૈકાન્તિકઃ યથા

પર્વતો વહ્નિમાન્પ્રમેયત્વાદિતિ ।
પ્રમેયત્વસ્ય વહ્ન્યભાવવતિ હ્રદે વિદ્યમાનત્વાત્ ।
સર્વસપક્ષવિપક્ષવ્યાવૃત્તઃ પક્ષમાત્રવૃત્તિઃ
અસાધારણઃ ।
યથા શબ્દો નિત્યઃ શબ્દત્વાદિતિ ।
શબ્દત્વં હિ સર્વેભ્યો નિત્યેભ્યોઽનિત્યેભ્યશ્ચ
વ્યાવૃત્તં શબ્દમાત્રવૃત્તિઃ ।
અન્વયવ્યતિરેકદૃષ્ટાન્તરહિતોઽનુપસંહારી ।
યથા સર્વમનિત્યં પ્રમેયત્વાદિતિ ।
અત્ર સર્વસ્યાપિ પક્ષત્વાદ્દૃષ્ટાન્તો નાસ્તિ ।
સાધ્યાભાવવ્યાપ્તો હેતુર્વિરુદ્ધઃ ।
યથા શબ્દો નિત્યઃ કૃતકત્વાદિતિ ।
કૃતકત્વં હિ નિત્યત્વાભાવેનાઽનિત્યત્વેન વ્યાપ્તમ્ ।
યસ્ય સાધ્યાભાવસાધકં હેત્વન્તરં વિદ્યતે સ
સત્પ્રતિપક્ષઃ ।
યથા શબ્દો નિત્યઃ શ્રાવણત્વાચ્છબ્દત્વવત્ ।
શબ્દોઽનિત્યઃ કાર્યત્વાદ્ઘટવત્ ।
અસિદ્ધસ્ત્રિવિધઃ આશ્રયાસિદ્ધઃ સ્વરૂપાસિદ્ધો
વ્યાપ્યત્વાસિદ્ધશ્ચેતિ ।
આશ્રયાસિદ્ધો યથા ગગનારવિન્દં સુરભિ
અરવિન્દત્વાત્સરોજારવિન્દવત્ ।
અત્ર ગગનારવિન્દમાશ્રયઃ સ ચ નાસ્ત્યેવ ।
સ્વરૂપાસિદ્ધો યથા શબ્દો ગુણશ્ચાક્ષુષત્વાત્ ।
અત્ર ચાક્ષુષત્વં શબ્દં નાસ્તિ શબ્દસ્ય
શ્રાવણત્વાત્ ।
સોપાધિકો હેતુઃ વ્યાપ્યત્વાસિદ્ધઃ ।
સાધ્યવ્યાપકત્વે સતિ સાધનાવ્યાપકત્વમુપાધિઃ ।
સાધ્યસમાનાધિકરણાત્યન્તાભાવાપ્રતિયોગિત્વં
સાધ્યવ્યાપકત્વમ્ ।
સાધનવન્નિષ્ઠાત્યન્તાભાવપ્રતિયોગિત્વં
સાધનાવ્યાપકત્વમ્ ।
પર્વતો ધૂમવાન્વહ્નિમત્વાદિત્યત્રાર્દ્રેન્ધનસંયોગ

ઉપાધિઃ ।

તથાહિ ।

યત્ર ધૂમસ્તત્રાર્દ્રેન્ધનસંયોગ ઇતિ સાધ્યવ્યાપકતા ।

યત્ર વહ્નિસ્તત્રાર્દ્રેન્ધનસંયોગો નાસ્ત્યયોગોલકે

આર્દ્રેન્ધનસંયોગાભાવાદિતિ

સાધનાવ્યાપકતા ।

એવં સાધ્યવ્યાપકત્વે અસ્તિ

સાધનાવ્યાપકત્વાર્દ્રેન્ધનસંયોગ ઉપાધિઃ ।

સોપાધિકત્વાદ્વહ્નિમત્ત્વં વ્યાપ્યત્વાસિદ્ધમ્ ।

યસ્ય સાધ્યાભાવઃ પ્રમાણાન્તરેણ નિશ્ચિતઃ સ

બાધિતઃ ।

યથા વહ્નિરનુષ્ણો દ્રવ્યત્વાજ્જલવત્ ।

અત્રાનુષ્ણત્વં સાધ્યં તદભાવ ઉષ્ણત્વં

સ્પર્શનપ્રત્યક્ષેણ ગુહ્યતે

ઇતિ બાધિતત્વમ્ ॥ ૪૬॥

ઉપમિતિકરણમુપમાનમ્ ।

સંજ્ઞાસંજ્ઞિસમ્બન્ધજ્ઞાનમુપમિતિઃ ।

તત્કરણં સાદૃશ્યજ્ઞાનમ્ ।

અતિદેશવાક્યાર્થસ્મરણમવાન્તર વ્યાપારઃ ।

તથા હિ

કશ્ચિદ્ગવયશબ્દાર્થમજાનન્કુતશ્ચિદારણ્યકપુરુષાદ્ગોસદૃશો

ગવય ઇતિ શ્રુત્વા વન ગતો વાક્યાર્થં

સ્મરન્ગોસદૃશં પિણ્ડં પશ્યતિ ।

તદનન્તરમસૌ ગવયશબ્દવાચ્ય

ઇત્યુપમિતિરુત્પદ્યતે ॥ ૪૭॥

આપ્તવાક્યં શબ્દઃ ।

આપ્તસ્તુ યથાર્થવક્તા ।

વાક્યં પદસમૂહઃ ।

યથા ગામાનયેતિ ।

શક્તં પદમ્ ।

અસ્માત્પદાદયમર્થો બોદ્ધવ્ય ઇતીશ્વરસંકેતઃ

શક્તિઃ ॥ ૪૮॥

આકાઙ્ક્ષા યોગ્યતા સંનિધિશ્ચ વાક્યાર્થજ્ઞાનહેતુઃ
પદસ્ય
પદાન્તરવ્યતિરેકપ્રયુક્તાન્વયાનનુભાવકત્વમાકાઙ્ક્ષા ।
અર્થાબોધો યોગ્યતા ।
પદાનામવિલમ્બેનોચ્ચારણં સંનિધિઃ ॥ ૪૯॥

આકાઙ્ક્ષાદિરહિતં વાક્યમપ્રમાણમ્ ।
યથા ગૌરશ્વઃ પુરુષો હસ્તીતિ ન
પ્રમાણમાકાઙ્ક્ષાવિરહાત્ ।
અગ્નિના સિઞ્ચેદિતિ ન પ્રમાણં યોગ્યતાવિરહાત્ ।
પ્રહરે પ્રહરેઽસહોચ્ચારિતાનિ ગામાનયેત્યાદિપદાનિ ન
પ્રમાણં સાંનિધ્યાભાવાત્ ॥ ૫૦॥

વાક્યં દ્વિવિધમ્ ।
વૈદિકં લૌકિકં ચ ।
વૈદિકમીશ્વરોક્તત્વાત્સર્વમેવ પ્રમાણમ્ ।
લૌકિકં ત્વાપ્તોક્તં પ્રમાણમ્ ।
અન્યદપ્રમાણમ્ ॥ ૫૧॥

વાક્યાર્થજ્ઞાનં શબ્દજ્ઞાનમ્ ।
તત્કરણં શબ્દઃ ॥ ૫૨॥

અયથાર્થાનુભવસ્ત્રિવિધઃ સંશયવિપર્યયતર્કભેદાત્ ।
એકસ્મિન્ધર્મિણિ વિરુદ્ધનાનાધર્મવૈશિષ્ટ્યાવગાહિ
જ્ઞાનં સંશયઃ ।
યથા સ્થાણુર્વા પુરુષો વેતિ ।
મિથ્યાજ્ઞાનં વિપર્યયઃ ।
યથા શુક્તૌ ઇદં રજતમિતિ ।
વ્યાપ્યારોપેણ વ્યાપકારોપસ્તર્કઃ યથા યદિ વહ્નિર્ન
સ્યાત્તર્હિ ધૂમોઽપિ ન સ્યાદિતિ ॥ ૫૩॥

સ્મૃતિરપિ દ્વિવિધા ।
યથાર્થાયથાર્થા ચ ।
પ્રમાજન્યા યથાર્થા ।

અપ્રમાજન્યાઽયથાર્થા ॥ ૫૪॥

સર્વેષામનુકૂલતયા વેદનીયં સુખમ્ ॥ ૫૫॥

સર્વેષાં પ્રતિકૂલતયા વેદનીયં દુઃખમ્ ॥ ૫૬॥

ઇચ્છા કામઃ ॥ ૫૭॥

ક્રોધો દ્વેષઃ ॥ ૫૮॥

કૃતિઃ પ્રયત્નઃ ॥ ૫૯॥

વિહિતકર્મજન્યો ધર્મઃ ॥ ૬૦॥

નિષિદ્ધકર્મજન્યસ્ત્વધર્મઃ ॥ ૬૧॥

બુદ્ધ્યાદયોઽષ્ટાવાત્મમાત્રવિશેષગુણાઃ ॥ ૬૨॥

બુદ્ધીચ્છા પ્રયત્ના દ્વિવિધાઃ ।
નિત્યા અનિત્યાશ્ચ ।
નિત્યા ઈશ્વરસ્યાનિત્યા જીવસ્ય ॥ ૬૩॥

સંસ્કારસ્ત્રિવિધઃ ।
વેગો ભાવના સ્થિતિસ્થાપકશ્ચેતિ ।
વેગઃ પૃથિવ્યાદિચતુષ્ટયમનોવૃત્તિઃ ।
અનુભવજન્યા સ્મૃતિહેતુર્ભાવના ।
આત્મમાત્રવૃત્તિઃ ।
અન્યથાકૃતસ્ય પુનસ્તદવસ્થાપકઃ સ્થિતિસ્થાપકઃ
કટાદિપૃથિવીવૃત્તિઃ ॥ ૬૪॥

ચલનાત્મકં કર્મ ।
ઊર્ધ્વદેશસંયોગહેતુરુત્ક્ષેપણમ્ ।
અધોદેશસંયોગહેતુરપક્ષેપણમ્ ।
શરીરસંનિકૃષ્ટસંયોગહેતુરાકુઞ્ચનમ્ ।
વિપ્રકૃષ્ટસંયોગહેતુઃ પ્રસારણમ્ ।
અન્યત્સર્વં ગમનમ્ ।
પૃથિવ્યાદિચતુષ્ટયમનોમાત્રવૃત્તિ ॥ ૬૫॥

નિત્યમેકમનેકાનુગતં સામાન્યં
દ્રવ્યગુણકર્મવૃત્તિ ।

તદ્દ્વિવિધં પરાપરભેદાત્ ।
પરં સત્તા ।
અપરં દ્રવ્યત્વાદિઃ ॥ ૬૬॥

નિત્યદ્રવ્યવૃત્તયો વ્યાવર્તકા વિશેષાઃ ॥ ૬૭॥

નિત્યસમ્બન્ધઃ સમવાયઃ ।
અયુતસિદ્ધવૃત્તિઃ ।
યયોર્દ્વયોર્મધ્યે
એકમવિનશ્યદપરાઽશ્રિતમેવાવતિષ્ઠતે
તાવયુતસિદ્ધૌ
યથા અવયવાઽવયવિનૌ ક્રિયાક્રિયાવન્તૌ જાતિવ્યક્તી
વિશેષનિત્યદ્રવ્યે ચેતિ ॥ ૬૮॥

અનાદિઃ સાન્તઃ પ્રાગભાવઃ ।
ઉત્પત્તેઃ પૂર્વં કાર્યસ્ય ।
સાદિરનન્તઃ પ્રધ્વંસઃ ।
ઉત્પત્યનન્તરં કાર્યસ્ય ।
ત્રૈકાલિકસંસર્ગાવચ્છિન્નપ્રતિયોગિતાકોઽત્યન્તાભાવઃ ।
યથા ભૂતલે ઘટો નાસ્તીતિ ।
તાદાત્મ્યસમ્બન્ધાવચ્છિન્નપ્રતિયોગિતાકોઽન્યોન્યાભાવઃ ।
યથા ઘટઃ પટો નેતિ ॥ ૬૯॥

સર્વેષાં પદાર્થાનાં યથાયથમુક્તેષ્વન્તર્ભાવાત્સપ્તૈવ
પદાર્થા ઇતિ સિદ્ધમ્ ॥ ૭૦॥

કણાદન્યાયમતયોર્બાલવ્યુત્પત્તિસિદ્ધયે ।
અન્નંભટ્ટેન વિદુષા રચિતસ્તર્કસંગ્રહઃ ॥

ઇતિ શ્રીમહામહોપાધ્યાય
અન્નંભટ્ટવિરચિતતર્કસંગ્રહઃ સમાપ્તઃ ॥

Encoded by Vlad Sovarel (vlad.sovarel at yahoo.com)
Proofread by Vlad Sovarel, Br. Chaitanya Vijay

*Tarka-Sangraha of Annambhatta*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*